# षष्ठः पाठः

## सोमदत्तप्राप्ति–कथा

ततः परस्मिन्दिवसे वामदेवान्तेवासी तदाश्रमवासी समाराधितदेवकीर्ति निर्भर्त्सितमारमूर्ति कुसुमसुकुमारं कुमारमेकमवगम्य्य नरपतिमवादीत्–'देव ! तीर्थयात्राभिलाषेण कावेरीतीरमागतोऽहं तत्र विलोलालकं बालकं निजोत्सङ्गतले निधाय रुदतीं स्थविरामेकां विलोक्यावोचम्–'स्थविरे! का त्वम्, अयमर्भकः कस्य नयनानन्दकरः, कान्तारं किमर्थमागता, शोककारणं किम् इति।

**शब्दार्थ :** अन्तेवासी–शिष्यः–छात्र । निर्भर्त्सितमारमूर्तिः–कामदेवात् सुन्दरतरः–कामदेव से अधिक सुन्दर । विलोलालकः –चञ्चलकेशपाशः–हिलते हुए केश वाला । कान्तारम्–अरण्यम्–वन । निधाय–संस्थाप्य–रख कर । स्थविराम्–वृद्धाम्–वृद्ध स्त्री को । निजोत्सङ्गतले–स्वकीयक्रोडे–अपनी गोद में ।

**सरलार्थ :** इसके बाद दूसरे दिन उस समय आश्रम में रहने वाले वामदेव के शिष्य देवार्चन के बाद जो कामदेव से भी अधिक सुन्दर फूलों के समान सुकुमार कुमार राजा के समीप जाकर बोला–देव ! तीर्थयात्रा की अभिलाषा से कावेरी के तट पर मैं गया । वहाँ हिलते हुए केश वाले एक बालक को अपनी गोद में रखकर रोती हुई एक वृद्धा स्त्री को देखकर मैंने कहा–'वृद्धे तुम कौन हो ? यह बालक किसकी आँखों में आनन्द देने वाला हैं, किस प्रयोजनवश जंगल में आयी हो, तुम्हारे दुःख का कारण क्या है, आदि ।

सा करयुगेन वाष्पजलमुन्मृज्य निजशोकशङ्कूत्पाटनक्षममिव मामवलोक्य शोकहेतुमवोचत्–'द्विजात्मज! राजहंसमन्त्रिणः सितवर्मणः कनीयानात्मजः सत्यवर्मा। तीर्थयात्राभिलाषेण देशमेनमागच्छत्। स कस्मिंश्चिदग्रहारे कालीं नाम कस्यचिद् भूसुरस्य नन्दिनीं विवाह्य तस्या अनपत्यतया गौरीं नाम तद्भगिनीं काञ्चनकान्तिं परिणीय तस्यामेकं तनयमलभत। काली सासूयमेकदा धात्र्या मया सह बालमेनमेकेन मिषेणानीय तटिन्यामेतस्यामाक्षिपत्। करेणैकेन बालमुद्धृत्यापरेण प्लवमाना नदीवेगागतस्य कस्यचित्तरोः शाखामवलम्ब्य तत्र शिशुं निधाय नदीवेगेनोह्यमाना केनचित्तरुलग्नेन कालभोगिनाहमदंशि। मदवलम्बीभूतो भूरुहोऽयमस्मिन्देशे तीरमगमत्। गरलस्योद्दीपनतया मयि मृतायामरण्ये कश्चन शरण्यो नास्तीति मया शोच्यते इति।

**शब्दार्थ :** वाष्पजलम्–अश्रु–आंसू । उन्मृज्य–प्रोञ्छ्य–पोंछकर । मिषेण–व्याजेन–बहाने से । अग्रहारे–राजदत्तग्रामे–राजा के दिये गाँव में । काञ्चनकान्तिः–स्वर्णवत् रूपयुक्तः–कान्तिमय । उत्पाटनक्षमम्–निष्कासने समर्थम्–निकालने में समर्थ । उद्दीपनतया–उत्कटतया–बढ़ जाने से । प्लवमाना–तरन्ती–तैरती हुई । उह्यमाना (वह+यक्+शानच्)– नीयमाना–ले जायी जाती हुई । अदंशि–दष्टा–डँसी गई । शोकशङ्कुः–शोकरूपं कण्टकम्–शोकरूप

काँटा । अवोचत्– अवदत्–कहा । अनपत्यतया–सन्तानाभावेन–सन्तान न होने के कारण । तनयम्–आत्मजम्–पुत्र को । भूरुहः–वृक्षः–पेड़ । शरण्यः–आश्रयदाता–शरण देने वाला । करेण–हस्तेन–हाथ से । धरणीतले–भूतले–पृथ्वी पर । अशक्यम्–असम्भवम्–असम्भव । आदाय–गृहीत्वा–लेकर । सासूयम्–ईर्ष्यापूर्वकम्–ईर्ष्या के साथ । कालभोगिना–सर्पेण–साँप द्वारा । गरलम्–विषम्–विष । विरच्य–कृत्वा–बनाकर ।

**सरलार्थ :** उसने अपने दोनों हाथों से आँसू पोंछकर शोक रूपी काँटे को उखाड़ती हुई मुझे देखकर शोक का कारण कहा– हे ब्राह्मण पुत्र ! राजहंस के मंत्री सितवर्मा का छोटा पुत्र सत्यवर्मा है । वह तीर्थयात्रा की अभिलाषा से इस प्रदेश में आया और राजा के दिए गाँव में काली नामक किसी ब्राह्मण की पुत्री से विवाह किया, उसके संतानहीन रहने पर उसकी बहन गौरी जो सोने की कांति की तरह थी, से विवाहकर उसमें एक पुत्र प्राप्त किया । ईर्ष्यावश एक बार काली मुझ धायी के साथ इस बालक को नदी में फेंक दिया । एक हाथ से इस बालक को उठाकर दूसरे हाथ से तैरती हुई नदी की धारा के वेग से आए हुए किसी पेड़ की डाली को पकड़कर, वहाँ बालक को रखकर नदी के वेग से ले जायी जाती हुई मुझे किसी काला नाग ने डँस लिया । जिस पेड़ पर मैं था वह इस क्षेत्र में नदी के किनारे आ गया । विष की तीव्रता से मेरे मर जाने पर इसका कोई आश्रय, इस जंगल में नहीं होगा, मैंने सोचा ।

ततो विषमविषज्वालावलीढावयवा सा धरणीतले न्यपतत् । दयाविष्टहृदयोऽहं मन्त्रबलेन विषव्यथामपनेतुमक्षमः समीपकुञ्जेष्वोषधिविशेषमन्विष्य प्रत्यागते व्युत्क्रान्तजीवितां तां व्यलोकयम् ।

तदनु तस्याः पावकसंस्कारं विरच्य शोकाकुलचेता बालमेनमगतिमादाय सत्यवर्मवृत्तान्तश्रवणवेलायां यन्निवासाग्रहारनामधेयस्याश्रुततया तदन्वेषणमशक्यमित्यालोच्य भवदमात्यतनयस्य भवानेवाभिरक्षितेति भवन्तमेनमनयम् ।

तन्निशम्य सत्यवर्मस्थितेः सम्यगनिश्चिततया खिन्नमानसो नरपतिः सुमतये मन्त्रिणे सोमदत्तं नाम तदनुजतनयमर्पितवान् । सोऽपि सोदरमागतमिव मन्यमानो विशेषेण पुपोष ।

**शब्दार्थ :** तीरम्–पुलिनम्–तट । ज्वालावलीढावयवा–ज्वालया ग्रस्ताङ्गवती–दाह से प्रभावित अंगों वाली । शोकाकुलचेता–विषादव्याकुलहृदयः–विषाद से व्याकुल मन वाला । खिन्नमानसः–विपन्नचित्तः–दुःखी मन वाला । पुपोष–पालितवान्–पालने लगा ।

**सरलार्थ :** विष के दाह से प्रभावित अंगों वाली वह पृथ्वी पर गिर गई । दया युक्त हृदयवाली में मन्त्र के द्वारा विष के कष्ट को दूर करने में अक्षम होकर समीप की झाड़ी में औषधि विशेष को खोजकर आने पर उसे मरी हुई देखी ।

तब उसका अग्नि संस्कार करके शोकाकुल मन से इस बालक को शीघ्रतापूर्वक लाकर–सत्यवर्मा की कथा सुनने के समय–राजा के दिए हुए गाँव की खोज में अक्षम होकर सोची कि आप तो मंत्री के पुत्र की रक्षा करेंगे, आपके समीप लाई हूँ ।

इसे सुनकर सत्यवर्मा खिन्न मन से भली प्रकार सोचकर अपने बुद्धिमान मंत्री सोमदत्त सके छोटे भाई के पुत्र को दे दिया । वह भी सोदर का पुत्र मानकर सम्यक् प्रकार नका पालन पोषण किया ।

## व्याकरणम्

ः

वान्तेवासी= वामदेव + अन्तेवासी । तदाश्रमवासी = तद् + आश्रमवासी । क्यावोचम् = विलोक्य + अवोचम् । द्विजात्मजः = द्विज + आत्मजः । त्यापरेण = उद्धृत्य + अपरेण । कस्यचित्तरोः = कस्यचित् + तरोः । ोऽयमस्मिन्देशे = भूरुहः + अयम् + अस्मिन् + देशे । प्रत्यागतः = प्रति + तः । भवानेवाभिरक्षितेति = भवान् + एव + अभिरक्षिता + इति

स :

र्त्सितमारमूर्तिम् = निर्भर्त्सिता मारस्य मूर्ति : येन तम् (बहुव्रीहिसमासः) नविषज्वालालीढ़ावयवा = विषमं विषं (कर्मधारयः)। तस्य ज्वालया अवलीढ़ाः (तृतीया 0) अवयवा : यस्याः सा (बहुव्रीहिसमास) । शोकाकुलचेता – शोकेन आकुलं चेतः । सः (बहुव्रीहि समासः)।

पत्तिः

ोक्य = वि + लोक् + ल्यप् । निधाय = नि + धा + ल्यप् । उन्मृज्य = उद् ृज् + ल्यप् । अवलम्ब्य = अव + लम्ब् + ल्यप् । विरच्य = वि + रच् + ल्यप् । ोच्य = आ + लोच् + ल्यप् । निशम्य = नि + शम् + ल्यप्

## अभ्यासः

निम्नलिखितानां प्रश्नानाम् उत्तरं संस्कृतभाषायां लिख्यताम् –

(क) सत्यवर्मा कः आसीत् ?

(ख) सत्यवर्मणः भार्ये का आस्ताम् ?

(ग) सोमदत्त : कीदृशः आसीत् ?

(ड़) गौरी का आसीत् ?

उत्तराणि–

(क) सत्यवर्मा सितवर्मणः कनीयानात्मजः आसीत् ।

(ख) सत्यवर्मणः भार्ये काली गौरी च आस्ताम् ।

(ग) सोमदत्त : उदारचेतः आसीत् ।

(ड़) गौरी भूसुरस्य भगिनी आसीत् ।

अधोलिखितानां पदानां संस्कृतवाक्येषु प्रयोगं कुरुत–

(i) अन्तेवासी (ii) आगता (iii) कान्तारम्

(iv) भूरुहः (v) अक्षिपत् (vi) आदाय

उत्तराणि–

(i) अन्तेवासी–वनात् अन्तेवासी आगच्छति ।

(ii) आगता–वने किमर्थं आगता ।

(iii) कान्तारम्–कान्तारे वन्यजीवाः निवसन्ति ।

(iv) भूरुहः–भूरुहः मेघाच्छादितः वर्तते ।

(v) अक्षिपत्–सः अग्नौ तृणं अक्षिपत् ।

(vi) आदाय–छात्रः पुस्तकं आदाय गृहं आगच्छत् ।

3. निम्नलिखितानां पदानां प्रकृतिप्रत्यय–विभागं कुरुत –

(i) निधाय (ii) विलोक्य (iii) उन्मृज्य

(vi) प्रत्यागतः (v) विरच्य

उत्तराणि–

(i) निधाय–नि + धा + ल्यप्

(ii) विलोक्य–वि + लोक् + ल्यप्

(iii) उन्मृज्य–उद् + मृज् + ल्यप्

(vi) प्रत्यागतः–प्रति + आ + गम् + क्त

(v) विरच्य–वि + रच् + ल्यप्

4. सन्धिविच्छेदं कुरुत –

(i.) कुञ्जेष्वोषधिविशेषम् (ii.) इत्यालोच्य (iii.) नास्तीति

(vi.) तन्निशम्य (v.) सम्यगनिश्चिततया

उत्तराणि–

(i.) कुञ्जेष्वोषधिविशेषम्–कुञ्जेषु + ओषधिविशेषम्

(ii.) इत्यालोच्य–इति + आलोच्य

(iii.) नास्तीति–न + अस्ति + इति

(vi.) तन्निशम्य–तत् + निशम्य

(v.) सम्यगनिश्चिततया–सम्यक् + अनिश्चिततया

5. अधोलिखितानां पदानां रिक्तस्थानेषु प्रयोगं कुरुत –

सत्यवर्मा, वाष्पजलम् , विलोलालकम्, पुपोष, न्यपतत्।

(क) सा करयुगेन ............. उन्मृज्य मामवलोक्य अवोचत्।

(ख) सितवर्मणः कनीयानात्मजः ................. आसीत्।

(ग) सा धरणीतले ............. ।

(घ) तत्र स ..................... बालकम् अपश्यत्।

(ङ) सोऽपि सोदरमागतमिव मन्यमानो विशेषेण

उत्तराणि–
(क) सा करयुगेन वाष्पजलम् उन्मृज्य मामवलोक्य अवोचत्।
(ख) सितवर्मणः कनीयानात्मजः सत्यवर्मा आसीत्।
(ग) सा धरणीतले न्यपतत् ।
(घ) तत्र स विलोलालकम् बालकम् अपश्यत्।
(ङ) सोऽपि सोदरमागतमिव मन्यमानो विशेषेण पुपोष।
अधोलिखितेषु वाक्येषु ल्यप् प्रत्ययस्य प्रयोगः क्रियताम्।
(क) एकां वृद्धां ............ अन्तेवासी अवदत्। (वि, लोक)
(ख) सः कुसुमसुकुमारं बालकं निजोत्सङ्गतले ............ रुदतीं वृद्धाम् अपश्यत्।
(नि, धा)
(ग) सा करयुगेन वाष्पजलम् .................... अवोचत्। (उत्, मृज)
(घ) तस्याः वचनं .............. शोकाकुलचेताः सः गतः। (नि, शम्)
(ङ) तं बालकम् ................ सः अन्तेवासी अपि गतः । (आ, दा)
उत्तराणि–
(क) एकां वृद्धां विलोक्य अन्तेवासी अवदत्।
(ख) सः कुसुमसुकुमारं बालकं निजोत्सङ्गतले निधाय रुदतीं वृद्धाम् अपश्यत्।
(ग) सा करयुगेन वाष्पजलम् उन्मृज्य अवोचत्।
(घ) तस्याः वचनं निशम्य शोकाकुलचेताः सः गतः।
(ङ) तं बालकम् अदाय सः अन्तेवासी अपि गतः ।
उचितविभक्तिप्रयोगं कृत्वा वाक्यानां पूर्तिः करणीया:–
(क) अस्मिन् .......... किमर्थम् आगता ? (वन)
(ख) सा .......... अवलोक्य अवोचत्। (अस्मद्)
(ग) काली .......... सह नदीतटे अगच्छत् । (तत्)
(घ) सः .................... विषव्यथाम् अपनेतुं क्षमः आसीत्। (मन्त्रबल)
(ङ) ........................ करेण बालमुद्धृत्य अपरेण प्लवमाना स्त्री मया दृष्टा। (एक)
उत्तराणि–
(क) अस्मिन् वने किमर्थम् आगता ?
(ख) सा माम् अवलोक्य अवोचत्।
(ग) काली तेन सह नदीतटे अगच्छत् ।
(घ) सः मन्त्रबलेन विषव्यथाम् अपनेतुं क्षमः आसीत्।
(ङ) एकेन करेण बालमुद्धृत्य अपरेण प्लवमाना स्त्री मया दृष्टा।
निम्नलिखितानां प्रश्नानामुत्तरेषु शुद्धम् उत्तरं लिख्यताम् –
(i.) सोमदत्तप्राप्तिकथायाः रचनाकारः कः आसीत् ?
(क) कालिदासः (ख) भारविः
(ग) दण्डी (घ) वाल्मीकिः उत्तरम्–(ग) दण्डी

(ii.) "सोमदत्तप्राप्ति–कथा" दशकुमारचरितग्रन्थस्य कस्मिन् भागे वर्तते?
(क) पूर्वपीठिकाया: द्वितीयोच्छ्वासे
(ख) पूर्वपीठिकाया: प्रथमोच्छ्वासे
(ग) उत्तरपीठिकाया: द्वितीयोच्छ्वासे
(घ) उत्तरपीठिकाया: प्रथमोच्छ्वासे
उत्तरम्–(ख) पूर्वपीठिकाया: प्रथमोच्छ्वा

(iii.) सोमदत्तस्य माता का आसीत् ?
(क) काली (ख) माला
(ग) गौरी (घ) सूर्या
उत्तरम्–(ग) गौ

(iv.) गौरी कस्य पत्नी आसीत् ?
(क) राजहंसस्य (ख) सितवर्मण:
(ग) सत्यवर्मण: (घ) कृष्णवर्मण: उत्तरम्–(ग) सत्यवर्म

## वस्तुनिष्ठ प्रश्नोत्तर

✦ अधोलिखितानां प्रश्नानां समुचितम् उत्तरं प्रदत्तेषु विकल्पेषु चित्वा लिखत

**1. 'सोमदत्तप्राप्तिकथा' कस्मात् ग्रन्थात् संकलिता विद्यते ?**
(क) दशकुमारचरितात् (ख) पञ्चतन्त्रात्
(ग) हितोपदेशात् (घ) महाभारतात् **उत्तरम्–(क**

**2. दशकुमारचरितस्य कति भागा: विद्यन्ते ?**
(क) पञ्च (ख) त्रय:
(ग) चत्वार: (घ) द्वि: **उत्तरम्–(ख**

**3. दशकुमारचरितस्य रचयिता क: वर्तते ?**
(क) विष्णु शर्मा: (ख) नारायणपण्डित:
(ग) दण्डी: (घ) माघ: **उत्तरम्–(ग**

**4. दशकुमारचरिते कस्य वर्णनम् अस्ति ?**
(क) दशराजकुमाराणाम् (ख) दशामात्यकुमाराणाम्
(ग) दशमुनिकुमाराणाम् (घ) दशकुमाराणाम् **उत्तरम्–(घ)**

**5. मगधराज: क: आसीत् ?**
(क) राजहंस: (ख) बालहंस:
(ग) राजवंश: (घ) सुवंश: **उत्तरम्–(क)**

**6. कस्यान्वेकारी नरपतिमवादीत् ?**
(क) कामदेवस्य (ख) वामदेवस्य
(ग) सोमदेवस्य (घ) रामदेवश्य **उत्तरम्–(ख)**

**7. अन्येकासी तीर्थयात्राभिलाषेण कुत्र गतवान् आसीत् ?**
(क) गंगातीरम् (ख) यमुनातीरम्

(ग) कावेरीतीरम् (घ) सावरमतीतीरम् उत्तरम्–(ग)

8. मगधराज राजहंसस्य मंत्रिनः किं नाम ?

(क) कीर्तिवर्मा (ख) सत्यवर्मा

(ग) शुभवर्मा (घ) सितवर्मा उत्तरम्–(घ)

9. राजहंसस्य मंत्रिनः पुत्रस्य किं नाम ?

(क) सत्यवर्मा (ख) सितवर्मा

(ग) शुभवर्मा (घ) मर्मवर्मा उत्तरम्–(क)

10. सत्यवर्मा प्रथमे किं नाम ब्राह्मण कन्यया सह विवाहं कृतवान् ?

(क) गौरी (ख) काली

(ग) सरस्वती (घ) सुमती उत्तरम्–(ख)

11. सत्यवर्मा अनपत्यतया कया सह विवाहं कृतवान् ?

(क) काली (ख) भवानी

(ग) गौरी (घ) भारती उत्तरम्–(ग)

12. सत्यवर्मणः मन्त्रिनः किम् नाम ?

(क) ब्रह्मदत्तः (ख) देवदत्तः

(ग) धर्मदत्तः (घ) सोमदत्तः उत्तरम्–(घ)